# शास्त्री प्रथमवर्षम्

## षष्ठपत्रम् व्याकरणम्

## शैक्षिकनिष्पत्तिः

(वैयाकरणसिद्धान्तकौमुदी)

शास्त्रिप्रथमवर्षे षष्ठपत्ररूपेण वैयाकरणसिद्धान्तकौमुदीग्रन्थः निर्धारितः वर्तते। तत्र प्रथमसत्रार्द्धे अस्य ग्रन्थस्य अव्ययीभावप्रकरणात् बहुव्रीहिप्रकरणं यावत् अंशः पाठ्यक्रमे निर्धारितः वर्तते। द्वितीयसत्रार्द्धे च अस्यैव ग्रन्थस्य रक्ताद्यर्थप्रकरणम्, शैषिकप्रकरणम्, मत्वर्थीयप्रकरणम्, प्राग्दिशीयप्रकणं च निर्धारितम् अस्ति। अस्य पत्रस्य अध्ययनेन निम्नलिखितानि प्रयोजनानि सिध्यन्ति।

- अव्ययीभावसमासं सम्यग् विज्ञाय संस्कृतभाषायां तस्य प्रयोगः।
- तत्पुरुषसमासं तस्य भेदञ्च विज्ञाय संस्कृतभाषायां तस्य प्रयोगः।
- बहुव्रीहिसमासं विज्ञाय तस्य संस्कृतभाषायां प्रयोगः।
- छात्राः रक्ताद्यर्थशौषिक-मत्वर्थीय-प्राग्दिशीयप्रत्ययान् सम्यग् विज्ञाय तेषां संस्कृतभाषायां प्रयोगं कर्तुं शक्नुयुः।
- पत्रममूयधीत्य छात्राः शास्त्रान्तरम्, दर्शनान्तरम्, वेदं च अध्येतुं समर्थाः भवितुमर्हन्ति।